योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः १६

षोडशः सर्गः १६

श्रीवसिष्ठ उवाच ।

अथाक्षिप्य वचस्तस्य तनयस्य तथा भृगोः ।

उवाच भगवान्कालो वचो गम्भीरनिःस्वनः ।। १

काल उवाच ।

समङ्गातापसीमेतां तनुं संत्यज्य भार्गव ।

प्रविशेमां तनुं साधो नगरीमिव पार्थिवः ।। २

काले पूर्वजया तन्वा तपः कृत्वा तया पुनः ।

गुरुत्वमसुरेन्द्राणां कर्तव्यं भवतानघ ।। ३

महाकल्पान्त आयाते भवता भार्गवी तनुः।

अपुनर्ग्रहणायैषा त्याज्या प्रम्लानपुष्पवत् ।। ४

जीवन्मुक्तपदं प्राप्तस्तन्वा प्राक्तनरूपया ।

महासुरेन्द्रगुरुतां कुर्वंस्तिष्ठ महामते ।। ५

कल्याणमस्तु वां यामो वयं त्वभिमतां दिशम् ।

न किंचिदपि यच्चित्तं यस्य नाभिमतं भवेष्पत् ।। ६

इत्युक्त्वा मुञ्चतोर्वाष्पं तयोः सोऽन्तरधीयत ।

तप्तांग्योरिव रोदस्योः सममंशुभिरंशुमान् ।। ७

गते तस्मिन्भगवति कृतान्ते भवितव्यताम् ।

विचार्य भार्गवोऽभेद्यां नियतेर्नियतां गतिम् ।। ८

कालकारणसंशुष्कां भाविपुष्पशुभोदयाम् ।

विवेश तां तनुं बालां सुलतामिव माधवः ।। ९

सा ब्राह्मणीतनुर्भूमौ विवर्णवदनाङ्गिका ।

पपात कम्पिता तूर्णं छिन्नमूला लता यथा ।। १०

तस्यां प्रविष्टजीवायां पुत्रतन्वां महामुनिः ।

चकाराप्यायनं मन्त्रैः स कमण्डलुवारिभिः ।। ११

सर्वा नाड्यस्ततस्तन्वास्तस्याः पूर्णा विरेजिरे ।

सरितः प्रावृषीवाम्बुपूरपूरितकोटराः ।। १२

नलिनी प्रावृषीवासौ मधाविव नवा लता ।

यदा पूर्णा तदा तस्याः प्रान्ताः पल्लविता बभुः ।। १३

अथ शुक्रः समुत्तस्थौ वहत्प्राणसमीरणः ।

रसमारुतसंयोगादापूर्ण इव वारिदः ।। १४

पुरोऽभिवादयामास पितरं पावनाकृतिम् ।

प्रथमोल्लासितो मेघः स्तनितेनेव पर्वतम् ।। १५

पिताथ प्राक्तनीं तन्वा आलिलिङ्गाकृतिं ततः ।

स्नेहार्द्रवृत्तिर्जलदश्चिरादद्रितटीमिव ।। १६

भृगुर्ददर्श सस्नेहं प्राक्तनीं तानवीं तनुम् ।

मत्तो जातेयमित्यास्थां हसन्नपि महामतिः ।। १७

मत्पुत्रोऽयमिति स्नेहो भृगुमप्यहरत्तदा ।

परमात्मीयता देहे यावदाकृतिभाविनी ।। १८

बभूवतुः पितापुत्रौ तावथान्योन्यशोभितौ ।

निशावसानमुदितावर्कपद्माकराविव ।। १९

चिरसंगमसंबद्धाविव चक्राह्वदम्पती ।

घनागमनसस्नेहौ मयूरजलदाविव ।। २०

चिरकालदृढोत्कण्ठौ तुल्ययोग्यतया तया ।

स्थित्वा तत्र मुहूर्तं तावथोत्थाय महामती ।। २१

समङ्गाद्विजदेहं तं भस्मसात्तत्र चक्रतुः ।

को हि नाम जगज्जातमाचारं नानुतिष्ठति ।। २२

एवं तौ कानने तस्मिन्पावने भृगुभार्गवौ ।

संस्थितौ तापसौ दीप्तौ दिवीव शशिभास्करौ ।। २३

चेरतुर्ज्ञातविज्ञेयौ जीवन्मुक्तौ जगद्गुरू ।

देशकालदशौघेषु सुसमौ सुस्थिरौ ततः ।। २४

अथासुरगुरुत्वं स शुक्रः कालेन लब्धवान् ।

भृगुरप्यात्मनो योग्ये पदेऽतिष्ठदनामये ।। २५

शुक्रोऽसौ प्रथममिति क्रमेण जात-

स्तस्मात्सत्परमपदादुदारकीर्तिः ।

स्वेनाशु स्मृतिपदविभ्रमेण पश्चा-

दन्येषु प्रविलुलितो दशान्तरेषु ।। २६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे भार्गव शुक्रस्य पुनर्जीवनं नाम षोडशः सर्गः ।। १६ ।।